# AMRITA VIDYALAYAM
## AMRITA PRE BOARD EXAMINATION 2019 - 20

**Class : X** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
प्रश्नानाम् निर्देशा: ध्यानेन अवश्यं पठनीया:।

| | | |
|---|---|---|
| खण्ड: क - अपठित अवबोधनम् | - | 10 अङ्का: |
| खण्ड: ख - रचनात्मककार्यम् | - | 15 अङ्का: |
| खण्ड: ग - अनुप्रयुक्त व्याकरणम् | - | 25 अङ्का: |
| खण्ड: घ - पठित अवबोधनम् | - | 30 अङ्का: |

## खण्ड: क - अपठित अवबोधनम्

**1. अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

जगति सर्वेषु सम्बन्धिषु मातु: पदम् अद्वितीयम् अस्ति। माता न केवलं जन्म ददाति अपितु व्यवहारस्य शिक्षाम् अपि यच्छति। बालकस्य चरित्रनिर्माणे अपि तस्या: अभूतपूर्व-योगदानम्। माता माननीया पूजनीया वा भवति। सा त्यागस्य मूर्ति: अपि भवति। अत: जगत: परिकल्पना अपि मातृरूपेण एव कृता। अथर्ववेदे कथितम् - "माता भूमि: पुत्रोऽहं पृथिव्या:"। माता तु स्नेहस्य वात्सल्यस्य च सजीव मूर्ति। वयं धेनुं 'गोमाता' इति कथयाम: स्वदेशाय च मातृभूमि: इति वदाम:। अत एव उपनिषत्सु अपि सर्वप्रथमम् उक्तम् - 'मातृदेवो भव' इति।

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **2**

क. जगत: परिकल्पना कस्मिन् रूपेण कृता?
ख. स्वदेशाय किं वदाम: वयम्?
ग. मातु: पदम् कीदृशम् अस्ति?

**II. पूर्णवाक्येन लिखत। (केवलं प्रश्नद्वयम्)** **4**

क. मातु: अभूतपूर्व - योगदानम् कुत्र?
ख. अथर्ववेदे किम् कथितम्?
ग. माता किं किं करोति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**IV. यथानिर्देशम् उत्तरत। (केवलं प्रश्नत्रयम्)** **3**

क. ‘कथयामः’ इति क्रियायाः कर्तृपदं किम्?
(गोमाता, स्वदेशम्, धेनुम्, वयम्)

ख. तस्याः इति सर्वनाम पदं कस्मै प्रयुक्तम्?
(मातृभूमये, धेनवे, मातुः कृते, अभूतपूर्व इति पदाय)

ग. ‘मूर्तिः’ इति पदस्य किं विशेषणं गद्यांशे प्रयुक्तम्?
(स्नेहस्य, त्यागस्य, वात्सल्यस्य, माता)

घ. ददाति इति अर्थे अत्र किं पदं प्रयुक्तम्?
(भवति, यच्छति, अस्ति, कथितम्)

## खण्डः ख - रचनात्मकं कार्यम्

**2. पत्रलेखनम्।**

**भवती कृपा। मातुः अस्वस्थताविषये लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत।** **5**

मञ्जूषा
(मातुः, पितृचरणाः, चिन्ताकुला, औषधं, अशक्तः, अहं, सुता, प्रणामाः, विद्यालये, मातृचरणयोः)

छात्रावासतः --------
तिथिः ----------
आदरणीयाः क. ---------
सादरं ख. ----------।

अहम् अत्र कुशलिनी। भवतः पत्रात् ग. -------- अस्वस्थताविषये ज्ञात्वा घ. ---------- अस्मि। आगामिमासे ङ. ---------- परीक्षाः भविष्यन्ति इति कारणेन गृहम् आगन्तुम् च. ------- अस्मि। समये समये मात्रे छ. -------- यच्छन्तु इति प्रार्थये। परीक्षायाः अनन्तरं ज. ---------- गृहम् आगमिष्यामि। झ. --------- मम प्रणामाः।

भवदीया ञ. -----------
कृपा

**3. चित्रवर्णनम्।**

**अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।** **5**

मञ्जूषा
(वाटिकायाम्, मृगाः, परस्परं, वृक्षाः, तडागे, जलं, समीपे, आगत्य, पिबन्ति, पक्षिणः, चिक्रोडाः, मीनाः)



अथवा

**मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत।**

"जीवने परिश्रमस्य महत्त्वम्"

मञ्जूषा

(परिश्रमेण, मनुष्यः, प्राप्नोति, जीवनस्य, सुखम्, विद्यां, धनं, सफलतां, सिध्यन्ति, कार्याणि)

रचनानुवादः।

4. **अधोलिखित वाक्यानि संस्कृतभाषया अनुद्य लिखत। (केवलं प्रश्नपञ्चकम्)** 5

क. The birds fly in the sky.

ख. Sea water is salty.

ग. Soldier falls from the horse.

घ. All of us will go to Prayag.

ङ. The wife of Dushyant was Shakuntala.

च. Trees are all around in the village.

ज. Courage is the greatest ornament of a man.

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

5. **अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा कुरुत। (केवलं प्रश्नचतुष्टयम्)** 4

क. न कदापि कुर्यादहितं कर्म।

ख. अयं एकः आदर्श विद्यालयः + अस्ति।

ग. बदरी+ छायायाम् उपाविशत्।

घ. सज्जनाः परोपकारं एव कुर्वन्ति।

ङ. आलस्यं हि मनुष्याणां शरीरस्थः +महान् रिपुः।

**6. अधोलिखितेषु रेखाङ्कितेषु शब्देषु समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 4**

क. सिंहासने स्थितः श्रीरामः।

(सिंहासनस्थः, सिंहासनास्थः, सिंहासनोस्थितः, सिंहस्थितः)

ख. अमन्त्रम् अक्षरम् नास्ति।

(अनमन्त्रम्, न मन्त्रम्, अन्यमन्त्रम्, अन्मन्त्रम्)

ग. शक्तिम् अनतिक्रम्य दानं कुर्यात्।

(यथाशक्तिम्, यथाबलम्, यथाशक्तिः, अशक्तिः)

घ. लाभालाभौ चक्रारिपंक्तिरिव गच्छतः।

(लाभः अलाभः च, लाभः च अलाभः, लाभश्च अलाभश्च, लाभः अलाभौ)

ङ. वीणापाणौ यस्याः सा सरस्वती अस्ति।

(वीणापाणि, वीणापाणिः, वीणापाणिं, वीणापाणी)

**7. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 4**

क. धनवान् नरः सर्वत्र मानं लभते।

(धन + मान्, धन + मतुप्, धन + क्तवतु, धन + वान्)

ख. भारते उद्योग + ठक् विकासः उत्तरोत्तरं वर्धते।

(औद्योगिकं, औद्योगिकः, औद्योगिका, उद्योगिकं)

ग. गीतायाः महत्त्वम् सर्वे जानन्ति।

(महत् + त्वा, मह + त्व, महत् + त्व, महत् + त्वम्)

घ. इयं बालिका कुमार + ङीप् अस्ति ।

(कुमारी, कुमारि, कुमारम्, कुमारः)

ङ. विद्यालयस्य सुन्दर + तल् दर्शनीया एव।

(सुन्दरम्, सुन्दरतम्, सुन्दरतल्, सुन्दरता)

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत। 3**

मञ्जूषा

(उपहाराः, पीयते, मया)

कोमलः- त्वं किं पिबसि?

सोनलः- मया आम्ररसः क. ---------।

कोमलः- किं त्वं गीतम् अपि गायसि?

सोनलः- आम्, ख. -------- गीतं अपि गीयते।

कोमलः- किं रामः उपहारान् ददाति?

सोनलः- आम्, रामेण ग. --------- दीयन्ते।

कोमलः- किं रामः पाठं पठति?

सोनलः- आम्, तेन पाठः पठ्यते।

अथवा

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत। (केवलं प्रश्नत्रयम्)**

क. अहं श्लोकं पठामि।

ख. अम्बया भोजनम् पच्यते।

ग. रामः ग्रामं गच्छति।

घ. तेन ग्रन्थः लिख्यते।

ङ. बालैः कोलाहलः क्रियते।

**9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत। (केवलं प्रश्नचतुष्टयम्)** **4**

क. (6.00) प्रातः --------- प्रशिक्षणार्थं गच्छामः। षड् वादने

ख. (6.45) प्रातः --------- वादने प्रशिक्षकः तत्र आगच्छति।

ग. (7.00) प्रातः --------- वादने क्रीडकाः आगच्छाति।

घ. (7.30) प्रातः --------- वादने तैः पादकन्दुकस्य अभ्यासः क्रियते।

ङ. (11.15) प्रातः -------- वादने सर्वे स्वगृहं गच्छन्ति।

**10. मञ्जूषायां प्रदत्तैः उचितैः-अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नषट्कम्)** **3**

मञ्जूषा

(अधुना, उच्चैः, अद्य, इतस्ततः, ह्यः, श्वः, अपि, कुतः)

क. ------- वने पशुमहोत्सवः अस्ति।

ख. तच्छ्रुत्वा वन्याः पशवः ------- धावन्ति।

ग. --------- रविवासरः आसीत्।

घ. --------- सोमवासरः भविष्यति।

ङ. अहम् -------- दूरदर्शनं पश्यामि।

च. त्वं --------- आगच्छसि?

छ. -------- नगरे मा गच्छ।

ज. देवालये -------- घण्टाध्वनिः भवति।

**11. अधोलिखितवाक्येषु रेखाङ्कितपदं अशुद्धपदं अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)** **3**

क. वयम् ह्यः जन्तुशालां <u>द्रक्ष्यामः</u>। (अपश्याव / अपश्यत् / अपश्याम )

ख. उद्यानं परितः वृक्षाः <u>आसीत्</u>। (अस्ति / आस्ताम् / आसन्)

ग. अहमेव तव मित्रम् <u>अस्ति</u>। (एधि / अस्मि / सन्ति)

घ. भवान् कुत्र <u>गच्छसि</u>? (गच्छति / गच्छतः / गच्छन्ति)

## खण्डः घ - पठित अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रवारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् - मान्यवर एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि 'त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति।

न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**I. एकपदेन उत्तरयत। (केवलं प्रश्नद्वयम्)** **1**

क. पुनः न्यायाधीशेन कस्मिन् विषये वक्तुमादिष्टौ?

ख. प्रवारकमपसार्य कः वदति?

ग. आरक्षिणि किं प्रस्तुतवति?

**II. पूर्णवाक्येन उत्तरयत। (केवलं प्रश्नमेकम्)** **1**

क. चौर्याभियोगे कति वर्षस्य कारादण्डं लप्स्यसे?

ख. न्यायाधीशः आरक्षिणे किं दण्डं आदिश्यति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत (केवलं प्रश्नत्रयम्)** **3**

क. अपमानम् इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?
(सम्मानम्, अपमानम्, सर्वाभिमानम्, आरक्षिणम्)

ख. परिणामम् इति पदस्य पर्यायपदं किं प्रयुक्तम्?
(फलम्, उक्तम्, कर्माणि, दण्डम्)

ग. चोरितायाः मञ्जूषायाः अनयोः पदयोः विशेष्य पदं किम्?
(मञ्जूषायाः, चोरितायाः, मया, वारितः)

घ. वर्णयामि इति क्रियापदस्य कर्तृपदं किम्?
(त्वम्, अहम्, वयम्, सः)

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **1**

क. गुणं कः न वेत्ति?

ख. पिकः कस्य गुणं वेत्ति?

ग. सिंहस्य बलं कः न वेत्ति?

**II. पूर्णवाक्येन उत्तरयत। (केवलं प्रश्नमेकम्)** **1**

क. सिंहस्य बलं कः जानाति कश्च न जानाति?

ख. वसन्तस्य गुणं कः जानाति कश्च न जानाति?

**III. भाषिककार्यम्। (केवलं प्रश्नत्रयम्)** 3

क. निर्बलः इति पदस्य विलोमपदं किम्?
(वेत्ति, बली, गुणी, करी)

ख. वायसः इति अर्थे किं पदं प्रयुक्तम्?
(निर्गुणः, करी, मूषकः, काकः)

ग. गुणी गुणं वेत्ति अत्र क्रियापदं किम्?
(गुणी, गुण, वेत्ति, अत्र)

घ. बली इत्यत्र कः प्रत्ययः प्रयुक्तः अस्ति?
(इनि, ङीप्, ठक्, ठञ्)

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

चंदनदासः– आर्य! किं मे भयं दर्शयसि सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्?

चाणक्यः– चंदनदास! एष एव ते निश्चयः?

चंदनदासः– बाढम्, एष एव मे निश्चयः।

चाणक्यः– (स्वगतम्) साधु। चंदनदास साधु।

सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना?

**I. एकपदेन उत्तरयत। (केवलं प्रश्नद्वयम्)** 1

क. चंदनदासं कः भयं दर्शयति?

ख. चाणक्यः मनसि कस्य प्रशंसां करोति?

ग. चंदनदासः कस्य गृहजनं न समर्पयितुं कथयति?

**II. पूर्णवाक्येन उत्तरयत। (केवलं प्रश्नमेकम्)** 1

क. अमात्यराक्षसस्य गृहजनं न समर्पयामि इति कस्य निश्चयः आसीत्?

ख. बाढम्, एष एव मे निश्चयः इति कः कं प्रति कथयति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** 3

क. अनिश्चयः इति पदस्य विलोमपदं नाट्यांशे किम् प्रयुक्तम्?
(साधु, निश्चय, निश्चयः गृहजनम्)

ख. आम् इति पदस्य पर्यायपदं नाट्यांशे किम् प्रयुक्तम्?
(दुष्करं, शिविना, बाढम्, गृहजनम्)

ग. किं मे भयं दर्शयसि अस्मिन् वाक्ये क्रियापदं किम्?
(किं, भयं, दर्शयसि, पश्यति)

घ. एषः एव मे निश्चयः। अत्र मे सर्वनामपदं कस्मै प्रयुक्तम?
(चंदनदासः, चाणक्यः चाणक्यस्य, चंदनदासाय)

**15. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** 4

क. हिमकरः बालभावात् शिवमस्तके शोभते।

ख. सिंहासनस्थः रामः प्रविशति।

ग. कुशनलवौ रामस्य समीपमुपसृज्य प्रणमतः।

घ. उदात्तरम्यः समुदाचारः।

ङ. अयम् अपूर्वः मानवानाम् सरस्वत्यवसरः।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकयोः अन्वयं पूरयत** **4**

मञ्जूषा

(अर्दपन्ति, अरयः, व्यायामिनं, स्थौल्यापकर्षणाम्, मांसं, समधिरोहति, सहसा, जरा)

क. न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात् ॥

अन्वयः - तेन सदृशं -------- च किञ्चित् न अस्ति। न च ------- मर्त्यम् -------- बलात् ---------।

ख. न चैनं सहसाक्रम्य जरा समधिरोहति।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च ॥

अन्वयः - --------- च एनम् --------- आक्रम्य न ---------
व्यायामाभिरतस्य च --------- स्थिरीभवति।

अथवा

मञ्जूषातः समुचितपदानि चित्वा भावार्थं पूरयत।

मञ्जूषा

(शरणम्, दुष्करम्, पर्यावरणे, शुद्धम्)

"दुर्वहमत्र जीवतिम् जातं प्रकृतिरेव शरणम्।"

अस्य भावः अस्ति यत् अद्यत्वे प्रदूषिते ------ मानवाय जीवनम् ------ जातम् अतः पर्यावरणं ------- स्वच्छं च करणीयं यतः प्रकृतेः ------- एव सुरक्षितं आश्रयम् अस्ति।

**17. अधोलिखितं कथांशं समुचितक्रमेण लिखत।** **4**

क. सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।

ख. कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।

ग. अयि शुभे! किमेवं रोदिषि? उच्यताम्।

घ. भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः अश्रूणि आविरासन् ।

ङ. क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नम् अकरोत्।

च. सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

छ. कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।

ज. तयोः बलिवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्।

**18. अधोखितानां शब्दानां विलोम पदेन सह मेलनं कुरुत।** **3**

| | | |
|---|---|---|
| क. | मित्रम् | प्रसीदति |
| ख. | प्रकुप्यति | अयोग्यः |
| ग. | योग्यः | शत्रुः |
| घ. | जनकः | जननी |

अथवा

**अधोलिखितवाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थं चित्वा लिखत।**

क. आवां यमलौ स्वः।
(शोभनीयः, सहोदरौ, लालनीयः)

ख. स किमपि न भणति।
(कथयति, गच्छति, पालयति)

ग. अयं मम वयस्यः अस्ति।
(जनः, मित्रम्, रिपुः)

घ. रात्रौ हिमकरः शोभते।
(तारकं, सूर्यः, चन्द्रः)